শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমদ্ভাগৱতে তৃতীযস্কন্ধে

# ॥ শ্রী কর্দমস্তুতিঃ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রী কর্দমস্তুতিঃ ॥

ঋষিরুৱাচ

জুষ্টং বতাদ্যাখিলসত্ত্বরাশেঃ
    সাংসিদ্ধ্যমক্ষ্ণোস্তৱ দর্শনান্নঃ।
যদ্দর্শনং জন্মভিরীড্য সদ্ভিঃ
    আশাসতে যোগিনো রূঢযোগাঃ ॥ 1 ॥

যে মাযযা তে হতমেধসস্ত্বৎ -
    পাদারৱিন্দং ভৱসিন্ধুপোতম্।
উপাসতে কামলৱায তেষাং
    রাসীশ কামান্নিরযেঽপি যে স্যুঃ ॥ 2 ॥

তথা স চাহং পরিৱোঢুকামঃ
    সমানশীলাং গৃহমেধধেনুম্।
উপেযিৱান্মূলমশেষমূলং
    দুরাশযঃ কামদুঘাঙ্ঘ্রিপস্য ॥ 3 ॥

প্রজাপতেস্তে ৱচসাধীশ তন্ত্যা
    লোকঃ কিলাযং কামহতোঽনুবদ্ধঃ।
অহং চ লোকানুগতো ৱহামি
    বলিং চ শুক্লানিমিষায তুভ্যম্॥ 4 ॥

লোকাংশ্চ লোকানুগতান্ পশূংশ্চ
    হিৎৱা শ্রিতাস্তে চরণাতপত্রম্।

পরস্পরং ৎৱদ্গুণৱাদসীধু -
    পীযূষনির্যাপিতদেহধর্মাঃ ॥ **5** ॥

ন তেঽজরাক্ষভ্রমিরাযুরেষাং
    ত্রযোদশারং ত্রিশতং ষষ্টিপর্ৱ।
ষণ্নেম্যনন্তচ্ছদি যত্ত্রিণাভি
    করালস্রোতো জগদাচ্ছিদ্য ধাৱৎ॥ **6** ॥

একঃ স্ৱযং সঞ্জগতঃ সিসৃক্ষযা -
    দ্বিতীযযাত্মন্নধিযোগমাযযা।
সৃজস্যদঃ পাসি পুনর্গ্রসিষ্যসে
    যথোর্ণনাভির্ভগৱন্ স্ৱশক্তিভিঃ ॥ **7** ॥

নৈতদ্ৱতাধীশ পদং তৱেপ্সিতং
    যন্মাযযা নস্তনুষে ভূতসূক্ষ্মম্।
অনুগ্রহাযাস্ত্বপি যর্হি মাযযা
    লসত্তুলস্যা তনুৱা ৱিলক্ষিতঃ ॥ **8** ॥

তং ৎৱানুভূত্যোপরতক্রিযার্থং
    স্ৱমাযযা ৱর্তিতলোকতন্ত্রম্।
নমাম্যভীক্ষ্ণং নমনীযপাদ -
    সরোজমল্পীযসি কামৱর্ষম্॥ **9** ॥

॥ ইতি শ্রী কর্দমস্তুতিঃ সমাপ্তা ॥